लोकप्रियसाहित्यग्रन्थमाला- ४६

# शाम्भवी



दीक्षितपुष्पा

राष्ट्रियसंस्कृतसंस्थानम्

मानितविश्वविद्यालयः

नवदेहली

# पुरोवाक्

साम्प्रतिकोऽयं समयो वर्तते संस्कृतभाषाया नवोन्मेषस्य नूतन-सम्भावनानां च । एष नवनवोन्मेषो नवीनाश्चेमाः सम्भावनाः समसामयिके संस्कृतसाहित्येऽपि प्रतिफलन्तीति शक्यं सुखमुच्छ्वसितुं सर्वैः सुरभारती-सेवकैः । यथा भारतीयप्रज्ञाया दायं बिभ्राणास्ते ते तेजस्विनः पण्डिताः प्रकटयन्ति शास्त्रवैभवं, तथैव कवयन्ति परःशताः सुकवयः निबध्नन्ति च विविधान् ग्रन्थानगणिताः साहित्यरचनानदीष्णाः सरस्वत्याः सुपुत्राः अस्यामेव भाषायाम् । वस्तुत ऊनविंशविंशशतकयोर्विपुलं साहित्यं संस्कृते व्यरचयन्नेते सुधियः सुकवयः । तस्य साहित्यस्य बहुमूल्यानि रचनारत्नानि सम्प्रति लुप्तप्रायाणि । वीरेन्द्रकुमारभट्टाचार्य-हरिदाससिद्धान्तवागीश-हृषीकेशभट्टाचार्य-अप्पाशास्त्रिराशिवडेकरसदृक्षाणां कवितल्लजानां समग्रं साहित्यमिदानीं न लभ्यते ।

राष्ट्रियसंस्कृतसंस्थानेन एतादृशानामुत्तमोत्तमरचनाकाराणां लुप्तप्रायस्य सत्साहित्यस्य पुनरुद्धाराय पुनः प्रकाशनाय च पदक्षेपो व्यधायि । अस्मिन्नुपक्रमे भट्टमथुरानाथशास्त्रिणां रतिनाथझावर्याणां मूलशङ्करमाणिकलालयाज्ञिकस्य च समग्रा रचना ग्रन्थावलीरूपेण प्रकाशिताः । केचन सन्ति तादृशा अपि जगन्नाथपाठक-अभिराजराजेन्द्रमिश्र-हर्षदेवमाधव-प्रभृतयो मूर्धाभिषिक्ताः सुकवयो येषां रचना राष्ट्रियसंस्कृतसंस्थानस्य लोकप्रियग्रन्थमालायां प्रकाशिताः ।

कवयित्री दीक्षितपुष्पा आधुनिक संस्कृतसाहित्ये भाषाप्रयोगाद्य-नेकदृष्ट्या भजते वैशिष्ट्यम् । अतीतेषु बहुषु वर्षेषु अग्निशिखेतिगीति-

# अनुक्रमः


| | | | |
|---|---|---|---|
| १. | शाम्भवी | – | १ |
| २. | इति शोचति भारतभूमिरियम् | – | २ |
| ३. | लोकोऽयम् | – | ८ |
| ४. | सभायां कत्थसे धीमन् | – | १० |
| ५. | पिपृच्छिषा | – | १२ |
| ६. | गृहं वनायते | – | १४ |
| ७. | कथं वर्ते ? | – | १५ |
| ८. | यतन्ते के ? | – | १७ |
| ९. | जनः शून्यप्रभो जातः | – | २० |
| १०. | किं करोमि ? | – | २२ |
| ११. | नरास्ते के ? | – | २५ |
| १२. | कीदृशः कालः ? | – | २७ |
| १३. | ग्रामवधूटी | – | २९ |
| १४. | समीहन्ते | – | ३२ |
| १५. | न जाने ? | – | ३४ |
| १६. | प्रीयते नो मनो मे | – | ३६ |
| १७. | मनोवेदनम् | – | ३९ |
| १८. | अहर्निशम् | – | ४२ |
| १९. | चातकेन किं कृतम् ? | – | ४५ |

# कथं वर्ते

स्वकीयैः शोणितैः प्रेम्णा मया या भूरि संसिक्ता।
अये सा वाटिका घूकैः समाक्रान्ता कथं वर्ते।।

असौ नानद्यमानोऽस्मिन् वने सिंहायते फेरुः।
तदर्चायामिमे सिंहाः समुद्भ्रान्ताः कथं वर्ते।।

शवे मांसं यदासीत् तत्तु गृध्रैर्भक्षितं पूर्वम्।
इमे श्वानोऽस्थिपुञ्जं भोक्तुमश्रान्ताः कथं वर्ते।।

मया गेहस्य रक्षायै नियुक्तो यः शठो भृत्यः।
स राजानत्यहं गेहाद् विनिष्क्रान्ता कथं वर्ते।।

गृहे येषां स्वचापल्यं विहायैषा स्थिरा लक्ष्मीः।
जिघत्सा दानवी तेषामविश्रान्ता कथं वर्ते।।

मदीया कामधेनुर्दुग्धराशीन् स्नौति यान् नित्यम्।
अये ! ते पानपूर्वं हन्त तक्रान्ताः कथं वर्ते।।

मया ते नामधेयं योजितं निःश्वाससन्ताने।
सखे मैत्री त्वदीया पश्य वज्रान्ता कथं वर्ते।।

स्थिता ये धर्ममार्गे केवलं सासद्यमानास्ते।
विपन्नानां दशा तेषामुदग्रान्ता कथं वर्ते।।